दिनाङ्क :- 03.07.2024
प्रात: - 06: 55

प्रधानमन्त्री/लोकसभा

प्रधानमन्त्री नरेन्द्रमोदी ह्य: प्रोक्तवान् यत् तस्य सर्वकारः सम्पूर्णतया भारतं प्रथमम् इति आदर्शवाक्येन पथप्रदर्शितः अस्ति। अपि च भ्रष्टाचारं विरुद्ध्य शून्यसहिष्णुतायाः तस्य नीतय: सद्यः जातेषु लोकसभानिर्वाचनेषु जनैः समर्थनप्राप्ताः सन्ति । सः अवदत् यत् तस्य सर्वकारेण तुष्टीकरणं विना, सर्वेभ्यः न्यायस्य नीतिः स्वीकृता अस्ति । श्रीमोदिना लोकसभायां द्वयोः सदनयोः संयुक्तसभायां राष्ट्रपते: द्रौपदीमुर्मूवर्यायाः धन्यवादप्रस्तावस्य उत्तरं प्रयच्छता एतत् उक्तम्। विपक्षम् आलक्ष्य प्रधानमन्त्रिणा उक्तं यत् सः तेषां दुःखम् अवगन्तुं शक्नोति, यतः मुधासूचनाप्रसारणं कृत्वा अपि लोकसभानिर्वाचनेषु विपक्षः पराभूतः । श्रीमोदी महानिर्वाचनेषु परिपक्वतां प्रज्ञां च प्रदर्शितुं देशवासिन: श्लाघिता:। सः अवदत् यत् जनाः तस्य सर्वकारस्य नीतिषु, अभिप्रायेषु समर्पणे च विश्वसन्ति अतः एव ते तृतीयवारं राष्ट्रीयलोकतान्त्रिकसंयुतिं शासनाधिरूढं कर्तुं मतदानं कृतवन्तः। श्रीमोदी उक्तवान् यत् सबका-साथ सबका विकास इति मन्त्रेण सह तस्य सर्वकारः कार्यरतः अस्ति। यदा प्रधानमन्त्री सदने अभिभाषते स्म, तदा विपक्षस्य सांसदाः विभिन्न-विषयान् अधिकृत्य विरोधप्रदर्शनं कृतवन्तः। सभापतिः ओम्-बिरला विपक्षिदलानाम् आचरणम् अभिलक्ष्य खिन्नतां प्रकटयन् सदने व्यवस्थां स्थापयितुम् आग्रहीतवान् परन्तु ते यथावत् कोलाहलं कृत्वा सदनस्य कार्यजातं पौन:पुन्येन प्रबाधितवन्त: ।

प्रधानमन्त्री/संसत्सन्देश:

प्रधानमन्त्री नरेन्द्रमोदी ह्य: राष्ट्रिय-लोकतान्त्रिक-संयुते: सांसदान् संसद: नियमानाम् अनुपालनाय संसदीय-लोकतन्त्रस्य सिद्धान्तानां स्थापनाय अनुकूलाचरणस्य प्रदर्शनाय च विनिवेदितवान्। श्रीमोदी गतप्रात: नवदिल्ल्यां एन.डी.ए.संयुते: उपवेशनं सम्बोधयन् एवम् उक्तवान्। उपवेशनानन्तरं वार्ताहरान् सम्बोधयन् संसदीय-कार्यमन्त्री किरेनरिजिजू: सूचितवान् यत् प्रधानमन्त्री सर्वेभ्य: एन.डी.ए.सांसदेभ्य: उचिताचरणं प्रति मार्गदर्शनमपि कृतवान् । श्रीरिजिजू: पुन: प्रोक्तवान् यत् प्रधानमन्त्री सबलं प्रत्यपादयत् यत् प्रत्येकं सांसद: देशसेवायै नागरिकै: चित: यो हि केनापि दलेन सम्बद्ध: वर्तते, राष्ट्रसेवा एव तस्य कर्तव्यमस्ति। प्रधानमन्त्री सांसदान् जल-पर्यावरण-सामाजिक-क्षेत्रेषु विशेषज्ञतां प्राप्तुम् अपि प्रोत्साहितवान्।

हाथरस:/दुर्घटना

उत्तरप्रदेशस्य हाथरसे ह्य: एकस्मिन् धार्मिक-कार्यक्रमे दुरापन्नायां दुर्घटनायां षोडशाधिक-शतं जना: मृत्युम् उपगता: अष्टादश अन्ये च गभीरतया व्रणिता: जाता:। एतदभिलक्ष्य मुख्यमन्त्रिणा योगिना आदित्यनाथेन गतदिने वरिष्ठाधिकारिभि: सह एकम् उपवेशनम् आकारितम् । दुर्घटनाम् अभिलक्ष्य प्रधानमन्त्रिणा, राष्ट्रपतिना, उपराष्ट्रपतिना च गभीर: शोक: प्रकाशित: व्रणितानां शीघ्र-स्वास्थ्यलाभाय कामना च कृता ।

## शंघाई-सहयोग-सङ्घटनम्

कजाखस्तानदेशस्य अध्यक्षतायां शंघाई-सहयोग-सङ्घटनपरिषद: चतुर्विंशतितमम् उपवेशनम् अस्य मासस्य चतुर्थे दिनाङ्के समायोज्यते। विदेशमन्त्री डॉ.एस्.जयशङ्कर: अस्तानायां शंघाई-सहयोग-संघटनसम्मेलने भारतीयदलस्य नेतृत्वं करिष्यति। स: गतदिने अस्तानां प्राप्तवान् । सम्मेलनेऽस्मिन् वैश्विक-नेतार: सङ्घटनस्य विगत-विंशतिवर्षाणां क्रियाकलापानां विविध-पक्षीय-सहयोगस्थिते: च समीक्षां विधास्यन्ति।

## दक्षिणपश्चिमीयप्रावृट्

दक्षिणपश्चिमीय-प्रावृट् आराष्ट्रं प्राप्त: । भारतीय-विज्ञान-विभागेन संसूचितं यत् राजस्थान-हरियाणा-पञ्जाब-राज्येभ्य: वर्षर्तुप्रभाव: अग्रे प्रसरित:। गुजरात-बिहार-असम-मेघालय-राज्यानां केषुचित् भागेषु महती वृष्टि: जाता। मध्यप्रदेश-महाराष्ट्र-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-उत्तरप्रदेशेष्वपि अतिवृष्टि: अमभवत्। ऋतुविज्ञानविभागेन उक्तं प्रख्यापितं यत् आगामिषु पञ्चदिवसेषु उत्तरपश्चिम-पूर्वोत्तरभारते सक्रियतया प्रावृट् प्रवर्धते। असमराज्ये जलौघस्थिति: गभीरा जाता। येन हि अष्टाविंशति-जनपदेषु एकादशलक्षाधिकं जना: जलौघप्रभाविता: अस्ति।

।। इति वार्ता: ।।